अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड—क (20) + खण्ड—ख (4+4)] एवं 10 पृष्ठाः सन्ति।

Roll No.
अनुक्रमाङ्कः

Code No.
कोड नं॰ **56/SS/A/S**

**Set/सेट A**

# संस्कृतम्

## (309)

Day and Date of Examination ..........................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ......................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ......................................................

***सामान्य अनुदेशाः —***

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 56/SS/A/S, सेट A अवश्यमेव लेखनीया।

## संस्कृतम्

## (309)

समयः —होरात्रयम् ] [ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिकः पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

### खण्ड—क

### केन्द्रिकः पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचिद**ेकस्य** पाठस्य सारं षड्वाक्येषु लिखत— 6

(क) काले फलति सौभाग्यम्

(ख) राजते खलु कन्याकुमारी

(ग) पर्यावरणस्य संरक्षणम्

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत— 1×4=4

तस्मिन् समये राक्षसः समागत्य प्रसन्नवदनं पुरुषं दृष्ट्वा विस्मितास्यं वदति, ''भो महासत्त्व, अत्र शिलायां प्रतिदिनं यः उपविशति स मदागमनात् पूर्वमेव म्रियते। त्वं पुनः महाधैर्यसम्पन्नः प्रसन्नवदनः दृश्यसे। यस्य मरणकालः समायातः तस्येन्द्रियाणि ग्लानिं प्राप्नुवन्ति। त्वं पुनरधिकां कान्तिं प्राप्य प्रहससि।''

**प्रश्नाः —**

(क) राक्षसः कीदृशं पुरुषं दृष्ट्वा विस्मितः?

(ख) राक्षसस्य आगमनात् पूर्वमेव पुरुषस्य किं भवति?

(ग) वध्यशिलायामुपविष्टः पुरुषः कीदृशः आसीत्?

(घ) कस्य इन्द्रियाणि ग्लानिं प्राप्नुवन्ति?

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं चित्वा लिखत— 1×4=4

(क) कन्याकुमार्या कः हतः? (महिषासुरः / बाणासुरः)

(ख) गुरुजनानां कथं विधानि चरितानि शिष्येण उपास्यानि? (सुचरितानि / दुश्चरितानि)

(ग) वैज्ञानिकाः अन्तरिक्षात् कस्याः सौंदर्यं वर्णितवन्तः? (नद्याः / पृथिव्याः)

(घ) ग्रहाणां वर्णनं कस्मिन् शास्त्रे वर्तते? (धर्मशास्त्रे / ज्योतिषशास्त्रे)

**4.** (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* विवेकानन्दस्य प्रतिमा स्मारकस्य मध्ये वर्तते।

*(ii)* क्रमेण एकदा ब्राह्मणस्य वारः समायातः।

(ख) प्रश्नान् उत्तरत— 1×2=2

*(i)* शल्यचिकित्सकैः व्रणसीवनार्थं किं युज्यते?

*(ii)* कः प्रकाशस्य वेगं वर्णितवान्?

**5.** एतत् कथनं कः कं प्रति कथयति? 2

(क) भोः पुत्राः, युष्माभिः नानादेशान् पर्यटद्भिः किं विचित्रं दृष्टम्?

(ख) साधवः परदुःखेन दुःखिताः भवन्ति।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2+2=4

(क) अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य स्थितः, पृथिव्या इव मानदण्डः॥

**प्रश्नौ—**

*(i)* हिमालयः कस्यां दिशायां स्थितोऽस्ति?

*(ii)* हिमालयः कस्या मानदण्ड इव स्थितः अस्ति?

(ख) तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥

**प्रश्नौ—**

*(i)* सज्जनाः अतिथीनां मानं केन वचसा कुर्वन्ति?

*(ii)* सतां गेहे कति वस्तूनि नोच्छिद्यन्ते?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
कुतस्तद् धनलुब्धानामितश्चेतश्च धावताम्॥

अन्वयः —

सन्तोषामृततृप्तानां, शान्तचेतसाम्, यत् ________ *(i)* तत् इतः च इतः च ________ *(ii)* धनलुब्धानां कुतः।

(ख) नित्यं स्नेहार्द्रशिरसः, शिरः शूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च॥

अन्वयः —

स्नेहार्द्रशिरसः, नित्यं शिरः शूलं, न ________ *(i)* न खालित्यं, न ________ *(ii)* न च, केशाः, प्रपतन्ति।

**8.** अधोलिखितपद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) विभवे सति किं प्रशस्तमौदार्यम्?

भावार्थः —

विभवे सति औदार्यम् _____ ।

(ख) प्रवान्ति वाताः समुदीर्णवेगाः।

भावार्थः —

वर्षाकाले वाताः कथं प्रवान्ति _____ ।

**9.** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत— 2

| | **स्तम्भ—अ** | | **स्तम्भ—ब** |
|---|---|---|---|
| *(i)* | तृणानि भूमिरुदकं | (क) | उभयं नाशयेदिदम् |
| *(ii)* | अपूजितं तु तद् भुक्तम् | (ख) | अश्वाः वहन्ति मे रथम् |
| *(iii)* | अनेकसुषिरं वाद्यम् | (ग) | वाक् चतुर्थी च सूनृता |
| *(iv)* | नित्यं रथेन गच्छामि | (घ) | कान्तं च ऋषिसंज्ञितम् |

**10.** 'हृदय-परिवर्तनम्' इति नाटकस्य सारांशः षड्वाक्येषु लिखत। सहायतायैः बिन्दवः दत्ताः — 6

**बिन्दवः**

अंगुलिमालकः, लुण्ठकः, नवनवतिः, अंगुलीनां माला धारयति, शतांगुलीनाम्, धारयितुम् एकदा बुद्धम्, आहूय, मालायां शतमा अंगुली हास्य अयाचत्, बुद्ध, त्वं कदा विरतः, प्राणिवधं त्यज, अहिंसा परमो धर्मः।

**11.** (क) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1+1=2

(सहसा वंशीध्वनिः गुंजति)

सर्वे यक्षाः : कुतोऽस्मिन् घोरे विपिने संगीतकम्? कोऽयं वंशीवादकः? एत, एत पश्यामः। ध्वनिम् अनुसरन्तो यामः।

प्रथमः : तर्कयामि, नाति दूरे कश्चन मुरलीं वादयति।

द्वितीयः : अहो, ज्ञायतेऽधुना यत्रैता गावो विचरन्ति, तत्समीपे एव तेन मुरलीवादकेन भवितव्यम्।

तृतीयः : पश्यत पश्यत, वटतरुतले निषण्णः कश्चिद् युवा वंशीं ध्वनति। तमुपसर्पामः।

**प्रश्नौ—**

*(i)* यक्षाः सहसा कस्य ध्वनिम् आशृण्वन्?

*(ii)* युवा वंशीं कुत्र ध्वनति स्म?

(ख) अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत— 1+1=2

विस्तीर्णलोहितमुखः परिवृत्तनेत्रो
भग्नांस कण्ठ कटिजानु करोरुजंघः।
विच्छिन्न हारपतिताङ्गदलम्बसूत्रो।
वज्रप्रभग्नशिखरः पतितो यथाद्रिः॥

**प्रश्नौ—**

*(i)* विस्तीर्णलोहितमुखः कः आसीत्?

*(ii)* कंसस्य शरीरं किमिव पतितं जातम्?

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत—

(क) **गद्यांशः**

बौद्धधर्मस्य प्रवर्त्तकः गौतमाख्यः कश्चित् क्षत्रियकुमार आसीत्। सः बाल्यादेव वीतराग आसीत्। वीतस्पृहं पुत्रमवलोक्य पितुर्मनसि महती चिन्ता अजायत। पुत्रे भोगाकाङ्क्षायाः उत्पादनाय निखिलोऽपि पितुः प्रयत्नो निष्फलो बभूव। गौतमः कदाचित् निशीथे सुप्तेषु जनेषु निःशब्दे च राजकुले गृहत्यागमकरोत्।

**प्रश्नाः —**

*(i)* अस्य गद्यांशस्य शीर्षकं लिखत। 1

*(ii)* गौतम परिचयः, तस्य गृहत्यागानन्तरम् आचरितं च लिख्यताम्। 2

*(iii)* गौतमः कदा कथं च गृहत्यागम् अकरोत्? 2

(ख) **पद्यांशः**

पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समापन्ने न सा विद्या न तद्धनम्॥

**प्रश्नाः —**

*(i)* अस्य श्लोकस्य शीर्षकं लिखत। 1

*(ii)* कीदृशी विद्या विद्या न भवति? 2

*(iii)* कीदृशं धनं धनं न भवति? 2

**13.** मञ्जूषापदसहायतया 'प्रातःकालः' इति विषयमधिकृत्य दशवाक्यानि लिखत— 1×10=10

| **मञ्जूषा** |
|---|
| सूर्यः, खगाः, कलरवं, जनाः उत्थाय, भ्रमणाय, विद्यार्थिनः, विद्यालयं, मार्गेषु, जनाः, स्व-स्वकार्ये, वृद्धाः, स्त्रियः, उद्यमिनः उद्योगं। |

**14.** भवान् विनीतः। भवतां विद्यालये पेयजलस्य अभावः अस्ति। तदर्थं विद्यालयस्य प्राचार्यं प्रति पत्रं लिखत। 6

**15.** भवान् रोगग्रस्तः अस्ति। अतः चिकित्सकस्य समीपं गत्वा कथं संवादं करिष्यति? तदर्थं चत्वारि संवाद-वाक्यानि लिखत। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— 1

(क) तं स गोमायुरालोक्य स्नेहादागतसम्भ्रमम्।

(ख) जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्।

**17.** (क) को हन्ति करिणां कुलम्?

अत्र रेखाङ्कितपदे का विभक्तिः? किं च मूलपदम्? 2

(ख) यथानिर्दिष्टं कुरुत— 2

बाणासुरः कस्य पुत्रः आसीत्? स जनान् अरक्षत्।

रेखाङ्कितपदद्वयं लट् लकारे परिवर्त्य लिखत।

(ग) यथानिर्दिष्टं वाच्य-परिवर्तनं कुरुत— 1

बलरामेण मुष्टिकः हन्यते। (कर्तृवाच्ये)

**अथवा**

राज्ञा लब्धदत्ताय फलं दीयते। (कर्तृवाच्ये)

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×5=5

(क) पृथिव्यां सर्वे _____ क्षेमाय भवन्तु। (पादप + उचित विभक्तिः)

(ख) रजकः _____ वस्त्राणि क्षालयति। (नदी + उचित विभक्तिः)

(ग) पिता पुत्रीं पाठशालम् _____ । (नी + लट् लकारः)

(घ) एकोऽपि वृक्षः राजाज्ञां विना _____ न शक्यते। (छिद् + तुमुन्)

(ङ) किराताः छायां _____ गच्छन्ति। (नि + सेव् + ल्यप्)

**19.** रेखाङ्कितपदस्य विग्रहं कृत्वा लिखत— 1×2=2

(क) न चास्यं कण्ठशोषः।

(ख) निद्रालाभः सुखं च स्यात्।

**20.** अधोलिखितवाक्ये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) भवन्तः कुत्र गच्छन्ति?

(ख) पर्यावरणस्य संरक्षणं करणीयम्।

## खण्ड—ख

### वैकल्पिक–I

### ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| | अ | | ब |
|---|---|---|---|
| *(i)* | जानकीजीवनम् | (क) | रेवाप्रसाद-द्विवेदी |
| *(ii)* | उत्तरसीताचरितम् | (ख) | राजेन्द्र-मिश्रः |
| *(iii)* | मेनकाविश्वामित्रम् | (ग) | डॉ० रामकरण-शर्मा |
| *(iv)* | रयीशः | (घ) | हरिनारायण-दीक्षितः |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत— 2

$10^3$, $10^4$, $10^7$, $10^{10}$

(ख) शून्यस्य अवधारणा सर्वप्रथमं कुत्र प्राप्यते? तस्य संकेतः कस्मिन् ग्रंथे प्राप्यते? 2

(ग) संस्कृतवाङ्मये श्रीपतिः नामकस्य प्रसिद्ध-गणितज्ञस्य ग्रंथनाम लिखत। 2

(घ) भावमिश्रेण विरचिते 'भावप्रकाशः' इति नामके ग्रंथे कस्याः चिकित्सायाः वर्णनं विद्यते? 1

**23.** संस्कृतस्य लौकिकं रूपं कस्मात् ग्रन्थात् प्रारभते? 2

**24.** (क) भारतीय-संस्कृतौ शरीरम् अतिरिच्य कस्य सत्ता स्वीक्रियते? 1

(ख) चत्वारः वर्णाः केन नाम्ना ज्ञायन्ते? 2

(ग) संस्काराः कति संख्याकाः भवन्ति? 1

## वैकल्पिक–II

### ( प्रयोजनमूलकसंस्कृतम् )

**21.** (क) संस्कृतभाषायां निर्मितस्य प्रथमचलचित्रस्य नाम किमस्ति?

(ख) संचारमाध्यमः कः कथ्यते?

(ग) संस्कृते वार्त्ताप्रसारस्य अवसानं किं कथयित्वा उद्घोष्यते?

(घ) आकाशवाणीभवने अनेके सम्पादकाः कुत्र उपविशन्ति? 1×4=4

**22.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) वैदिकशब्दानां ज्ञानं _____ इति वैदिककोशेन एव भवति।

(ख) भौतिक रसायनं, रत्नविज्ञानादीनि _____ कोशे सन्ति।

(ग) सेनायां _____ संस्कृतस्नातकः नियुज्यते।

(घ) आदि शंकराचार्यः इति _____ दूरदर्शने प्रसारितम्।

**23.** त्रैमासिकी पत्रिका का भवति? एकस्याः त्रैमासिकपत्रिकायाः नामोल्लेखं कुरुत। 2

**24.** (क) पत्रपत्रिकासु केषां संयोजनेन पत्रिकायाः मनोरंजकता वर्द्धते? 1

(ख) आकर्षकस्य शीर्षकस्य का उपयोगिता? 1

(ग) पत्रपत्रिकाणां प्रकाशनाय केषां नियमानां पालनं सम्पादकैः कर्त्तव्यम्? 1

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखित-चिह्नद्वयं तयोः अभिप्रायेण सह मेलयत— 2

| | अ | | ब |
|---|---|---|---|
| *(i)* | (-) | (क) | नवीना पंक्तिः |
| *(ii)* | (N/L) | (ख) | योजक-चिह्नम् |

★ ★ ★